Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 2 | ISSN : 2582-0095

# मनुष्याणां-गुणा जीवनस्य धर्मः प्रतिपादनम्



डॉ .मुकेश कुमार डागरः
(धर्माचार्यः) प्राचार्य,
सिद्धि विनायक कॉलेज,
,(सीकर)| राजस्थान,भारत।

**सारांशः**– बहुभिः प्रकारैः स्मृतीनां समालोचनेन ज्ञायते सद्व्यवहारः, आचरणं, सर्वेः पालनीयम् अन्यथा पतितो भवति मनुष्यः । समाजस्य मध्ये सामञ्जस्यं केन स्यात् तत्कृते यतेत। राष्ट्रस्य संवर्द्धनाय, उन्नत्यै सर्वदा दत्रयित्तेन भाव्यं मनुष्यैः ।

**मुख्यशब्दः**– मनुष्याणां,गुणा, जीवनस्य, धर्मः, प्रतिपादनम् **,** सद्व्यवहारः, आचरणं, मनुष्यैः।

**धर्मस्य वर्गीकरणम् द्विधा विभक्तः**–प्राचीन भारतस्य चिन्तनं धर्मविषये उत्कर्ष दृश्यते। तत्र धर्मः सम्प्रदायविशेषस्य पोषकः प्रतिपादको वा नासीत। मानव-जीवनस्य सर्वानुमोदितः मार्गः धर्मः | ऋषीणा मध्ये वैमत्य नावलोक्यते प्रत्युत वेदाधारितो धर्मः सनातनः नास्ति कुत्रापि सन्देहः। यस्य भूते-भविष्ये वर्तमाने च समास्थितिः स्यात् स एव शाश्वतः सनातनशब्दाभिधेयः। अस्माकं भारत देशे धर्मः एकः नियामकः प्रतिभातिः। सर्वस्यां परिस्थितौ धर्मः अस्मान् मार्गमुपदिशति। धर्मस्यकृते धनस्य प्रयोजनं नास्ति मनुष्यैः सर्वोऽपि व्यवहारः धर्मभय, कार्यः। सोऽयं धर्मः द्विधा विभक्तः।

१. श्रौतः २. स्मार्तश्च।

**१. श्रौतः -**

श्रौत धर्मस्य प्रतिपादकः ग्रन्थः वेदः (संहिता+ब्राह्मणम्)। श्रौतकर्माणामनुष्ठानं क्रियतेऽत्र। वैदिक संहितायां दर्शपूर्णमासादारभ्य अनेके यागाः प्रकल्पिताः। ते सर्वेऽपि त्रैवर्णिकेन् अनुष्ठेयाः सन्ति। संक्षेपेण श्रौतस्य लक्षणं मत्स्यपुराणे दृश्यते

"दाराग्निहोत्र सम्बन्धमिज्या श्रौतस्य लक्षणम्"।[1]

अयमर्थः पञ्चाग्नीनां यथाशास्त्रं स्थापनं अनन्तरं दर्शपूर्णमासादियागानामनुष्ठानम् श्रौतधर्मस्य अङ्गम्।

**२. स्मार्त धर्मः -**

स्मृतौ प्रतिपादिताः विषयाः स्मात धर्मस्य यथा -

"स्मार्तो वर्णाश्रमाचारो यमैश्च नियमै यतः"।[2]

अत्र वर्णाश्रम-यम-नियमानां व्याख्यानं भवति। स एव धर्मः महाभारते विधा विभक्तः तद्यथा -

"वेदोक्तः परमो धर्मः स्मृत्ति शास्त्र गतोऽपरः।

विशिष्ट चीर्णः परः प्रोक्तस्त्रयो धर्माः सनातनाः ॥[3]

अन्यच्च -

"वदोक्तः परमो धर्मः धर्मशास्त्रेषु चापरः ।

शिष्टचारश्च शिष्टानां त्रिविधं धर्म लक्षणम् ॥ [4]

याज्ञवल्वय स्मृतौ मिताक्षरायाः प्रसिद्धायां टीकायां षड्धा धर्मः विवेचितः यथा अत्र च धर्म शब्दः षड्विधस्मर्ते धर्म विषयः । वर्णधर्म आश्रम धर्मो, वर्णाश्रम धर्मो, गुण धर्मो निमित्रधर्मः साधारणधर्मश्चेति[5] । प्रसिद्धोऽस्मिन् विज्ञानेश्वरस्य मिताक्षरायाः लेखकः, भावः उल्लिखख्यते-तथा षण्णां धर्माणां पृथक विवेचनं दीयते -

**१. वर्ण-धर्मः** - ब्राह्मणो नित्यं महां वर्जयेत्यादिः तथैव अनयेषामपि वर्णानां धर्मः प्रतिपादितः।

२. आश्रम-धर्मः - आश्रमधर्मोऽग्नीन्धन भैहाचर्यादिः ।

३ वर्णाश्रम-धर्मः - पालाशो दण्डः ब्रह्मणस्य ।

४ गुणधर्मः - शास्त्रीयभिषेककादि गुण युक्तस्य राज्ञः प्रजापरिपालनादिः ।

5. निमित्तधर्मः - विहिताकरण प्रतिषिद्ध सेवन निमित्त प्रायश्चित्तम् । __ साधारणोधर्मः - साधारणोधर्मोऽहिंसादिः न हिंस्त्रात्सर्वभूतानि इति आचाण्डालं साधारणो धर्मः।

मनुस्मृतौ तावत् धर्मोद्विधा विभक्तः तद्यथा- "प्रवृत्तं च निवृत्तं च द्विविधं धर्म वैदिकम् ।

"इह वाऽमुत्र वा काम्यं प्रवृत्तमिति कीर्त्यते।

निष्कामं ज्ञानपूर्वन्तु निवृत्तमभिधीयते' ॥ [6]

इथं विवेचनेन सिद्ध प्रवृत्ति लक्षणः निवृत्तिलक्षणश्च द्विविधो धर्मः । यत्र सहेतुक: धर्मः अनुष्ठीयते स प्रवृत्ति लक्षणः। यथा 'पुत्रेष्टिः' अत्र यजमानः पुत्रहीनः सन् आचार्यस्यानियमानुरोधेन पुत्रलाभाय यज्ञः विधीयते अर्थात् 'पुत्रमिच्छतायजमानेन पुढेष्ट्या यागेन भाव्यम्' । तस्मात् सर्वसाधारणस्य पुत्रेष्टि यागे प्रवृत्तिर्न भवति । यत्र च हेतुः मोक्ष एव तत्र निवृत्ति लक्षणः इति वाच्यम् । निवृत्ति लक्षणेन धर्मेण पञ्चभूतान्मुक्तिः इति ।

उक्तं च मनुस्मृतौ -

"अकामोपहतं नित्यं निवृतं च विधीयते ।

कामतस्तु कृतं कर्म प्रवृत्तमुपदिश्यते ॥[7]

प्रवृतं कर्म संसेव्य देवनामेतिसाम्यताम् ।

निवृत्तं सेवामनस्तु भूतान्त्येति पञ्च वै ॥[8]

वराहपुराणे धर्मोद्विधा निरूपतिः तत्र फलं भवति धर्मस्याधारः -

प्रवृत्तिसंज्ञके धर्मे फलमभुदयोमतः ।

निवृत्ति संज्ञके धर्मे फलं निःश्रेयसं मतम् ।।

प्रवृत्ति लक्षणे धर्मे लौकिकम् लौकिकञ्चसुखमनु-भूयते जीवः दुःखानाञ्चात्यन्तिकोविनाशः । मोक्षः फलं निवृत्तिलक्षणस्य धर्मस्यः प्रवृत्ति धर्मः पुनः द्विधा विभक्तः -

"सामान्योधर्मः विशेषधर्मश्च"।[२]

सामान्यधर्मः जनसामान्यस्य कृते व्यवस्थितः असाधारणः वर्णधर्मानुरोधेन । वीरमित्रोदये मित्र मिश्रस्यापि अयमेवाशयः । बृहस्पति-स्मृतौ सामान्यो धर्मः

दयाक्षमाऽनसूया च शौचनायासमङ्गलम् ।

अकार्पण्यमस्पृहत्वं सर्व साधारणानि च ।।

विष्णु धर्मोत्तर इतोऽतिधकाः गुणाः सम्पादिताः –

क्षमा सत्यं दमः शौचं दानमिन्द्रिय संयमः |

अहिंसा गुरूशुश्रूषा तीर्थानुसरणं दया।।

आर्जवं लोभशून्यत्वं देवब्राह्मण पूजनम् ।

अनभ्य सूयां च तथा धर्मः सामान्य उच्यते ।।

महाभारतेऽपि सामान्योधर्मः व्यासेन प्रोक्तः

सत्यं दमस्तपः शौचं सन्तोषो हीः क्षमाऽऽर्जवम् ।

ज्ञानं दमो दयाध्यानमेवं धर्मः सनातन ।।

आनृशंस्यमहिंसाचाप्रमादः संविभागिता ।

श्राद्धकर्माऽतिथेयं च सत्यमक्रोध एव च ।।

स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयता।

आत्मज्ञानं तितिक्षा च धर्मः साधारेणोनृपा।।

देवल स्मृतावपि साधारणो धर्मो निरूपितः तद्यथा -

शौचं दानं तपः श्रद्धा गुरूसेवा क्षमा दया ।

विज्ञानं विनयं सत्यमिति धर्मसमुच्चयः ।।

आलोचनेन प्राप्यते श्लोकस्थाः गुणाः सर्वैः मनुष्यैः सेवनीयाः। एतेषामभावे पशुमनुष्ययोः विभागोऽपि निरर्थकः प्रतिभाति। तत्रैव बृहस्पति स्मृत्तौ साधारणधर्माणां पृथक् श्लोकेन निरूपणं दृश्यते -

**दया** -परे व बन्धुवर्गे व मित्रे द्वेष्टरि वा सदा।

आपन्ने रक्षितव्यं तु दयैषा परिकीर्तिता ।।

अत्र दया कुत्र कर्तव्याऽस्ति अस्योत्तरं ददाति शत्रुरपि यदि विपदग्रस्तः दया भवदव । स्वजनस्य का कथा। ज्ञायते यत दया मानवस्य स्वाभाविकी क्रिया वर्तते । तस्याः त्यागः न कर्त्तव्यः ।

**क्षमा** - बाध्ये चाध्यात्मिके चैव दुःखे चौत्पातिके क्वचित् ।

न कुपयन्ति न वा हन्ति सा क्षमा परिकीर्तिता ।।

सर्वासु अवस्थासु हिंसाक्रोधाभ्यां रहितः जनः क्षमावान् भवन्ति ।

**अनसूया** - न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि ।

नान्य दोषेषु रमते सानसूया प्रकीर्तिता।।

अयम्भावः सर्वत्र गुणाः दोषाश्च भवन्ति । परन्तु गुणेषु दोषाविष्करणमसूया तद्रहितः अनसूया । गुणानामवलोकनं अनुकरणम् पालनञ्च दोषेष्वपि गुणाः सन्ति तेषां ग्रहणम् ।

**शौचः** - अधर्मपरिहाश्च संसर्गश्चाप्यनिन्दितैः ।

स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ।।

सर्वतोभावेन अधर्माद्विरतिः सज्जनेन सह संपर्कः स्वसनातनधर्मे व्यवस्थितिः शौच पदेनोच्यते।

**मङ्गलम्** - प्रशस्ताचरणं नित्यमप्रशस्त बिवर्जनम्।

एतद्वि मङ्गलंप्रोक्तं मुनिभिस्तत्व दर्शिभिः ।।

शुभकर्मणा सततमाचरणं (अनुष्ठान) अशुभ कर्मणः त्यागः एव तत्वचिन्तकानां मते मङ्गलमस्ति ।

**अकार्पण्यम्** - स्तोकादपि च दातव्यं दीनेनान्तरात्मना ।

अहन्यहनि यत्किञ्चिदकार्पण्यं हि तत्स्मृतम् ।।

न्यूनादपि धनात् (पदर्थात्) दातव्यमेव ।

दानस्य महत्त्वं सर्वत्र प्रतिपादितं तस्मात् यद्भवेत् तदेव प्रयोजनवते देयम् इति अकार्पण्यं प्रोक्तम् ।

**अस्पृहा -** यथोत्पन्नेन सन्तोषः कर्तव्योध्यर्थ वस्तुना।

परस्याचिन्तयित्वार्थं साऽस्पृहा परिकीर्तिता ।।

प्रारब्धवशात प्राप्रेन धनेन सन्तोषः अन्यस्य धनस्य लिप्सायाः अभावः एव अस्पृहा पदवाच्या।

**सत्यम् -** सत्यंवद । इति कथनमुपनिषदः । सत्यान्न प्रमदियव्यम् ।[9] मनुस्मृतौ सत्यस्य प्रतिष्ठापनं सनातन धर्मे वर्तते -

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । .

प्रियं च नानृतं ब्रूयदेष धर्मः सनातन ।। [10]

भीष्मपितामहः युधिष्ठिरं ब्रूते सत्यात् पर: नास्ति धर्मः न च असत्यात् महत्तं । समेषां धर्माणां मूलं सत्यमेव । वेदस्यतथ्यमपि सत्ये निहितमस्ति । सत्यसमः सहस्रोऽपि अश्वमेघो न भवति। सत्यं सक्षात् परमेश्वरः। ।

"नास्ति सत्यात्परो धर्मो नानृतात् पातकं परम् ।

स्थितिर्हि सत्यं धर्मस्य तस्मात् सत्यं न लोपयेत ।। [11]

अंहिसा - श्रुतिर्भाषते- "न हिस्यात् सर्वभूतानि" देवल स्मृतौ -

'आत्मनः प्रतिकूलानि परेषां न समाचरेत' ।

अस्यभावः यो हि व्यवहारः भवतां कृते अनुकूलः प्रीत्युत्पादकः प्रतिभाति सैव अन्येषामपि । येन च कृष्टानुभूति भवति स परेषामपि तस्मात् ज्ञात भावेन व्यवहर्तव्यम् । महाभारतेस्येदं कथनं सत्यमेव -

आत्मनः प्रतिकूलानि परेभ्य यदि नेच्छसि ।

परेषां प्रतिकूलेभ्यो निवर्तय ततो मनः ।।

अष्टभिः प्रकारैः मनुः हिसायाः प्रकरणमुपन्यस्यति

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी।

संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ।।[12]

अष्टजनाः श्लोकेऽस्मिन् निरूपिताः। प्रथमस्तावत् अनुमन्ता नामकः यस्यानुमति विना बधोऽसम्भवः द्वितीयः विशसिता-मृतस्य पशोः अङ्गानां संभाजकः तृतीयः निहन्ता-पशोः संहारकः चतुर्थः विक्रेता मासस्य पञ्चमः क्रेता षष्ठ संस्कर्ता-मांस-पाचकः सप्तमः उपहर्ता मांसप्रदः अष्टमः खादकः मांसाशी। परन्तु मनुस्मृतौ ततोऽग्रे मनुर्लिखति विदुषां निर्वचनमत्र मां अर्थात् माम् मांसभोक्तारं जनं सः मृत् पशुः अमुष्मिन लोके खादयिष्यति । यस्य मासं इदानीमहं खादामि स एव जमान्तरे मां भक्षयिष्यति इति अर्थः यथा -

"मांस भक्षयिताऽमुत्र यस्य मांसमिहाम्यहम् ।

एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः" ।।[13]

**श्रद्धा -** सनातन धर्मे श्रद्धायाः अपि महत्त्वं परमं वर्तते । श्रद्धा शब्दं निरूपयत्र वेदान्तसारे

आह -

"गुरूपदिष्ट वेदान्त वाक्येषु विश्वासो नाम श्रद्धा"।[14]

गीतायां बहुत्र श्रृद्धा शब्दस्य निरूपणं दृश्यते यथा। श्रद्धा विरहितं तामसं परिचक्षते । त्रिगुणेषु यज्ञेषु यस्मिन् यज्ञे श्रद्धायाः सर्वथाऽऽभावः स यज्ञः तामसः । अन्यत्र च लिखति सर्वेषु स्वाध्यायादिष्वपि श्रद्धा प्रमुखा भवति। श्रद्धा विना निष्फलः यज्ञः त्यागश्च -

अश्रद्धया हुतं दत्तं तपस्तप्रं कृतं च यत् ।

असदित्युच्यते पार्थ न तत्प्रेत्य नो इह ।। [15]

देवीपुराणे साक्ष्यमस्ति अस्य -

कायक्लेशैर्न बहुभिर्ण चैवार्थस्य राशिभिः ।

धर्मः समाप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि ।।

बृहादारण्यकोपनिषदि विषयोऽयं इत्थमाह- कस्मिन्नु श्रद्धा प्रतिष्ठतेति ? हृदय इति होवाच ।

हृदयेन हि श्रदां जानाति हृदयेयेव श्रद्धा |

प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्यः ।।

इति सस्थिरं जातं श्रद्धां परित्यज्य व्यवहारे शास्त्रे च कुत्रापि कार्य न भवति । श्रद्धा प्रमुखा व्यवस्था कार्यस्य व्यवहारस्य च । इदानीं श्रद्धायाः कि फलमिति विचार्यते भगवान् मनुर्वदति।

श्रद्धयेष्टं च पूर्त च नित्यं कुर्यादतन्द्रितः ।

श्रद्धाकृते हयक्षते ते भवतः स्वागतैर्धनैः ।।[16]

अक्षय्यस्य फलस्य प्राप्तिः श्रद्धया भवति यदि न्यायार्जितेन धनेन इष्टापूर्तकर्म संपाद्यते चेत् निश्चितमेव । यस्य यादृशी श्रद्धा भवति बुद्धिरपि तादृशी एवा गीतायां श्रद्धायाः विभागः गुणत्रययोगेन दृश्यते ।

कायक्लेशैन बहुभिण चैवार्थस्य राशिभिः ।

धर्मः समाप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि।।

**प्रसङ्गेऽस्मिन् रेऊ महोदयस्य विचारः -**

'आत्मनः प्रतिकूलानि' इति वाक्यं महोदयस्यहृदि स्फुटितं भवति। तस्यैव वाक्यान्तरेणानुवादः अत्रापि दृश्यते –

यदात्मनो न रूचितं तत्परेभ्योऽपि वर्जयेत् ।

एष एव सदाचारः सर्वधर्मानुमोदितः ।।

अप्रमत्तेन तद्भाव्यं नरेणात्र सुखार्थिना ।

आहारे व्यवहारे चाध्ययने सेवनेऽपि च ।।[17]

स्वच्छन्द भ्रमणं, अशास्त्रीय भाषणं, सह-भ्रमणं गुप्ते वार्ता प्रसंगः स्वभगिन्यासह अपि निषिद्धः अन्या स्त्री सर्वथा त्याज्या एव । अयमत्र विशेषः पुरूषस्य (यूनः) युवतिभिःसह भ्रमणं, चिन्तनं एकान्ते प्रवासः विनाशाय कल्प्यते यतोहि तयोर्मध्ये विवेकः न जागृतः लोकापवादभयात् (यथार्थ-भयाच्च) उपर्युक्तं कर्म तेन न विद्यातव्यम् । तद्यथा -

स्वैरालापो विहरणं रहः सम्माषणादि च ।

भागिनीभिरपि त्याज्यं किमुतापरया स्त्रिया ।।

पितुः सेवापरो नित्यं मातुश्चापि विशेषतः।

धारयंश्च गुरौ श्रद्धा नरः कल्याणमश्नुते ।। [18]

विश्वेश्वरनाथस्य धर्म वैविध्येऽपि चिन्तनं सामयिकं दृश्यते । देशकालादि भेदेन धर्मः सुस्थिरः, सम्प्रदायः व्यवस्थितः अतएव नानत्वं धर्मादिषु अस्ति -

शिष्टैराप्तैश्च यत्प्रोक्तं देशकालोचितं पुनः ।

धर्मत्वं प्राप्य तत्सूते सम्प्रदायान् पृथक् पृथक ।।

अतएव हि धर्माणामनेकत्वं प्रदृश्यते।

कुलाचार प्रसङ्गचय तेषां संख्याऽभिवर्धते ।। [19]

अन्यत्र ग्रन्थस्य समाप्तौ महोदयस्य कथनं -

पुरा तु मुनयो धर्म वेदेषु परिकीर्तितम् ।

अनुसृत्य सुखेनैव प्रयाताः परमं पदम् ।। [20]

यथा अन्येषु पुराणेषु धर्मस्य दशमूल तत्त्वानां विवेचनं तथैव रेऊमहोदयोऽपि अनुसरति तद्यथा-दया-क्षमा धैर्यम् सत्यम्-दमः बुद्धिः-विनम्रता पवित्रता-विद्या-स्तेयस्य च त्यागः इति दश मूलानि धर्मस्य एते दश पालनीयाः भवन्ति एतेषां पालनेन अन्येषामपि धर्माणां पालनं भवत्येव । यथा ज्ञानस्य महिमा गीतायां कृष्णेन प्रोक्तः -

"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" ।[21]

तदेव विश्वेश्वरनाथः विशिनष्टि

"ज्ञानेष्वथात्मनो ज्ञानं सर्वेभ्योऽप्यधिकं मतम् ।

आत्मज्ञानेन चैकेन दुःखेभ्योमोक्षमश्नुते ।।[22]

आत्मज्ञान सर्वज्ञान प्रमुखम् । येन लब्धेन दुःखानां सर्वथाविनाशः । द्विविधं वैदिकं कर्म प्रवृत्ति जनकं, निवृत्ति जनकञ्च । तद्यथा -

"शुभेच्छायै कृतं कर्म प्रवृत्तिमयमुच्यते।

निष्कामं ज्ञानपूर्णं च निवृत्तिमयमीरितम् ।।

प्रवृत्तिकर्मतो लोके सुखमाप्नोति मानवः ।

निवृत्ति कर्मतः सोऽथ ज्ञानं विन्दत्यभीप्सितम् ।[23] ||४

सर्वेषां ग्रन्थानां विषयः संक्षेपेणः रेऊस्मृतौ निरूपितः। अतः प्राचीनानां मतं उपस्थापयन् विश्वेश्वरनाथस्यभिमतं चिन्तितम् ।

**अस्माभिः वर्ण-व्यवस्था सनातनधर्म पौषकैः -**

अस्माभिः सनातमधर्म पौषकैः चिन्त्यते वर्ण-व्यवस्था वेदकालादेव प्रवृत्ता अर्थात् सार्वकालिकेयं व्यवस्थ चत्वारो वर्णाः अस्य समाजस्य निधयः। परन्तु पक्षेऽस्मिन् विश्वेश्वरनाथस्य पृथक विचारः प्रसृतः । वर्णविभाजनं (चतुर्भिः प्रकारैः) आदी नासीत् अनन्तरं समाजस्य व्यवस्था सञ्चालनाय विभागो जातः तत्र विभागे कर्मणः प्रामुख्यमासीत् तद्यथा -

"नासीद्वर्णविभागः प्राम् मनुष्येषु ततः परम् ।

समाजस्य व्यवस्थार्थ कर्मभिः स व्यरच्यत" ॥[24]

इदानी कर्म विभागेन वर्णानां स्थितिः प्रदर्श्यते । धर्मस्य चिन्तकः पण्डितः तत्र ब्राह्मण पदेनं उद्धोषितः ततः रक्षायां कुशलः नीतेः नियमस्य च संपालकः द्वितीयोवर्णः क्षत्रियः जातः । कृषि कर्मणा जीवनयापकः, पशुपालनेन च प्रसन्नः वैश्यस्य पदवीमलभत् अवशिष्टः समाजस्यसेवायामनुरक्तः शूद्रवेनोद्धोषितः । एभिः प्रकारैः विद्वद्भिः संसारस्य वर्ण विभागः स्वीकृतः प्रकल्पितश्च । समाजे यथा परस्परं कलहस्योत्पत्तिर्न भवेत् तथैव वर्णविभागः। एको वर्ग विशेषः एकस्यविभागस्य (क्रियाकलापस्य कार्यस्म) सम्यक् सञ्चालनं प्राप्तकौशलेन करिष्यति तदनु तस्यान्वयोऽपि वंशस्य कलाकार्य अग्रेसारयति व्यवस्थायारभावे सर्वे कुम्भकाराः, पण्डिताः, मार्दङ्गिका कृषकाः यदि अभविष्यन् तर्हि समाजस्यावधारणां एव निरस्ता । इदानीं समाजस्य या संघः । परस्पर मनुरागः दृश्यते तदभावे असम्भवमेव प्रतिभाति । इदानीं समाजस्य प्राचीनः सिद्धान्त सर्वत्र खण्डितः एव । यस्मिन् व्यवसाये अधिकं धनं स्यात् तत्रैव समेषां प्रवाहः ब्राह्मणोऽपि मांसविक्रेता

दश्यते शूद्रोऽपि अनुष्ठाने पूजा पाठादौ च अनुरक्तं । अद्य वर्णव्यवस्था शिथिलतां गता। समाजोऽयं नवीनां संस्कृति (उपभोक्तावादस्य संस्कृतिम्) अनुसत्य कस्यां दिशि गन्तमीहते न जाने । प्रकृति सर्वस्य नियोजिका अस्ति सा एव इमां व्यवस्थां (पगुभूतां) सन्मार्गे स्थापयिष्यति । सम्प्रति श्लोकाः उदाहियन्ते –

"विद्वांसो धर्ममर्मज्ञा ब्राह्मणाः प्राग विनिर्मिताः।

रक्षाक्षमा नीतिपराः क्षत्रियास्तु ततः कृताः ॥

कृषिव्यापार पशुभिर्जीविनश्च विशः कृताः ।

सवार्थ हि समाजस्यापरे शूद्रा विनिर्मिताः॥

एवमेवाऽत्र रचितो विभागः कर्मणामपि ।

चातुर्वर्ण्यस्य विबुधैर्जनसंघर्षनाशक ॥

वेदे पुरूषसूक्ते यद् ब्रह्मणोरूप वर्णनम् ।

सहस्रशीर्षपादादि तत्समाजनिदर्शनम्" ॥[25]

विश्वेश्वरनाथस्याभिमतमस्ति पुरूष सूक्तादौ विराटपुरूषस्य अंणावयात् वर्णोत्पतिः श्रूयते तत्रापि लक्षणया चतुर्णा वर्णानां कर्मणः प्राशस्त्यमेव ज्ञायते विद्यायाः अध्यनाध्यापनं मुखेनैव भवति स एव धर्मः ब्राह्मणस्य। सज्जनानं पालनं दुष्टनाञ्च दमनं बाहुभ्यां स धर्मः

क्षत्रियेन पाल्यते यथा भोजनेन संपुष्ट: जंधप्रदेशेः शरीरधारणे क्षमः तथैव व्यापारेण पुष्ट: वैश्यः समाजस्य धारकः तथा सम्पूर्णस्य शरीरस्य आधारस्तम्भः पादः तथैव शूद्रस्याधारत्वेन समाजे स्थापनमस्ति । चतुर्णामवयवानां अभावे यथा गात्रमक्षमतां याति तथैव सर्वलक्षण युक्तस्य

समाजस्यापि वर्तते।

ब्राह्मणो मुखबाहूरूपादाद्योत्पत्तिरादितः ।

चातुर्वर्ण्यस्य कथिता साऽपि कर्मप्रबोधिनी ।।

विद्याया ग्रहणं दानं ज्ञानधर्मप्रवर्त्तनम् ।

व मुखस्य धर्म इत्याहु ब्राह्मणस्याप्यसौ मतः ।।

रक्षणं तु विनीतानां दुष्टानां दमनं तथा ।

धर्मो यो भुजयोः प्रोक्तः क्षत्राणां स विनिश्चितः ।।

यथोरू वहतो देहं पुष्टौ व्यायामभोजनात् ।

तथा समाजं वहति वैश्यो व्यापार पोषितः ।।

पादौ तु पद्यतेयाभ्यां शरीरं सर्वतस्तथा।

शूद्रसेवाप्तावकाशाः पद्यन्ते कर्मणिद्विजाः ।।[26]

ब्राह्मणः (वेदविज्ञः) सर्वत्र पूज्यः अस्ति । अत्र ध्यातव्यं तथ्यमिदं यत् पूजायां सर्वप्रथमं पादप्रक्षालनस्य कृत्यमायाति प्रणामः अपि चरणयोरेव सर्वत्र चरणस्पर्शः । अयमत्र विशेष शूद्रः चरणरूपः सोऽपि सम्मान्यः, आदरणीयश्च। न कोऽपि शिरः स्पृफ्ट्वा प्रणमति । शूद्र इत्युक्ते निकृष्टः, त्याज्यः मलिनः वा अर्थो न ग्राह्यः समाजस्य सर्वथा उपकारकः शूद्र । अद्य समाजे शूद्रस्य निन्दा श्रूयते अनुचितमेतत् यदि शूद्रः समाजे न भवेत् तर्हि ब्राह्मण एव तत् कार्य कर्ता । आचारभ्रष्टोऽपि आत्मानं ब्राह्मण कुले उत्पन्नमात्रे ब्राह्मणं मन्यते। निरादरः कदापि न करणीयः । अद्य कार्यालयेषु ब्राह्मणोऽपि आदेशपालस्य कार्य सहृदयं सम्पादयति तत्रैव अनयजातीय अपिभवति

अत: शद्रः ब्राह्मणो वा कार्ये साहाय्यं प्रयच्छति तस्मात् आदर योग्य असावपि । केवलं शदकले अस्य जन्म तस्मान्निरादरणीयः अशास्त्रीयमिदम् ।

उक्तञ्च रेऊमहोदयेन –

यथा तु द्विजपादनामुपेक्षा हानिदा मता।

समाजपादभूतानां शूद्राणामपि सा तथा।।

उपेक्षया निर्बलाभ्यां पद्भ्यां देहस्य या दशा।

समाजस्यापि सैव स्याच्छूद्रजातेरूपेक्षया ।।

नैव म्लेच्छोऽन्त्याजो वा स्याद् जन्मना किन्तु कर्मणा।

भ्रष्टाचारा सुबहवः कलौ तु द्विजमानिनः ।।

भ्रष्टाचारा अदण्ड्याश्चेत् कारणैर्विविधै भूवि ।

कथं विध्न उपस्थाप्यस्तहर्यन्यस्य क्रमोन्नतौ? ।।

वेद शास्त्र पुराणेषु वर्णोनत्यास्त्वनेकशः। .

तथैव चावनत्याश्च सन्त्युल्लेखा इतस्ततः ।।

विश्वामित्रस्तु राजर्षिर्ब्रह्मर्षिरभवत्पुरा ।

ज्यायाँसस्तस्य पुत्रास्तु शूद्रत्वं कर्मतो गताः ।।

कुलान्यद्याप्यचिन्त्यानि धनिनां चाधिकारिणाम् ।

कालस्यहि व्यवस्थेयं जगत्यां केन वार्यते ।।[27]

अनेनैव प्रकारेण ये राजानः पुरा बौद्ध जैन धर्मेषु दीक्षिताः अभवन् ते पुनः यज्ञयागादि

कर्मणामनुष्ठानेन पूताः सन्तः अग्विंशीयाः जाताः। वर्णानां चे धर्माः उक्ताः कालेनैव त कताः । तथा पुनः विद्योपजीवी जनः ब्राह्मणत्वेन समाजे व्यवस्थितः । युद्धादिषु नव प्रवीणाः भूपालाः क्षत्रियाः सन्ति विद्वांसः तान् क्षत्रियाः वदन्ति । व्यापारे दक्षाः कसीदवत्या धनोपार्जकाः वैश्य इति नाम्ना व्यवस्थिताः । शरीरश्रमेण जीवनस्य चक्रये चालयन्ति यत्र कुत्रपि किञ्चित् कृषि कर्माणि च कुवीन्ति ते शूद्र नामधेयाः ये हिसांदिभिः (मांसादि विक्रेताः रः) अन्वयान् पालयन्ति द्रव्योपार्जने चासक्ताः ते अन्त्यजाः इमे विभागाः विद्वद्धि प्रकल्पिताः। प्रबुद्धजनाः एव समाजस्य मार्ग निर्देशकाः भविन्त ते यथानामग्रहणं कुर्वन्ति तदनु इतरे जनाः (सामान्याः) अपि भाषन्ते । इदानीं बहुकर्मोपयोगिनः (Multip) जनाः पदार्थोः (सम्भाराः) दृश्यन्ते । यत्र एकस्मिन् जने कियन्तः गुणाः सन्ति अधिक गुणवतां जनानां समाजे प्रतिष्ठा दृश्यते । यथा एकः सम्भारः (वस्तु) कस्मिन् कस्मिन् कार्ये प्रयोगार्हः इति दृष्ट्वैव तस्य मूल्यं भवति उदाहरणार्थ एका लेखनी प्रथमतः लेखन कार्ये प्रयुज्यते यदि तथा लेखन्या हस्तिवार्तिकायाः (टॉर्च) अपि कार्य भवेत्, तस्यामेव सूचनायाः कृते दूरभाषस्यचकृते स्थानं स्यातां अतिरिक्तं कार्य अपि कुर्त शक्यते सा लेखनी समाजे प्रामुख्येन स्थानं गृहणाति। तथैव मनुष्यस्य स्थितिः दश्यते तस्मात् वर्ण व्यवस्थायाः तथाविधं महत्त्वं नावलोक्यते । एकः ब्राह्मणएव पठित्वाऽपि स्वयमेव श्मश्रोः कर्त्तन (नापितस्यकर्म) वस्त्रस्य प्रक्षालनं संस्कारश्च (रजकस्य कार्य) क्षेत्रे हलयन्त्रस्य चालनं (शूद्रस्य वैश्यस्य वा कार्य) पशुपालनं (वैश्यस्य कार्य) सर्वकार्य करोति अस्येदानी 'आत्मनिर्भरः' पदेन गणना क्रियते तथाचासौ उत्तमः पुरूषः । तस्मात् संशयमुत्पादयति कर्म विभागोऽपि इदानीं संकरीभूतं सकलं जगत् विद्यते यत्रैव लाभ: तत्रैव व्यापार: कामं स व्यापार: मांसस्य, मदिरायाः वा भवेत्। अतएव रेऊमहोदयः लिखति

"बौद्ध जैनादि धर्मेषु दीक्षिता येऽभवन्नृपाः ।

यज्ञपूताः पुनस्तेऽथो अग्निवंश्या इहाभवन् ॥

वर्णानां स्वानि कर्माणि पुरा प्रोक्तानि यानि तु ।

संकरं तानिनीतानि कालेन बलिना स्वयम् ॥

धर्मेण विद्यया बुद्ध्या लेखन्या ये च जीविनः ।

विप्र कर्माणि इति तान् प्राहुः कालविदो जनाः ॥

युद्धेन रक्षया वापि भूस्वाम्येनाथ ये पुनः।

जीवन्ति तान् बुधाः क्षत्र कर्माणि इति मन्वते ॥

व्यापारेणाथ शिल्पेन कुसीदेन च जीविनः ।

कृषीवलाश्च कुत्रापि वैश्यकर्मकरान् विदुः ॥

श्रमसाध्येन कार्येण कृष्या च पशुभिः क्वचित् ।

निर्वाहं ये तु कुर्वन्ति शूद्र कर्माणि एव ते ॥

अन्त्यजास्ते तु विज्ञेया हिंसयाऽशुचि कर्मभिः ।

ये जीवन्त्यथ सांकर्य कर्मणां चापि दृश्यते॥[28]

विश्वेश्वर स्मृतौ चतुर्णा वर्णानां कर्तव्यमुपदिष्टम् । स्वेच्छाचारः सर्वत्र दृश्यते तथापि धर्मशास्त्रस्य कार्य कर्त्तव्यबोधनमस्ति । अस्माभिः कि क्रियते तन्नस्ति प्रमुखं किं कर्तव्यम् ? इति विवेचनीयं वर्तते। तस्मिन् प्रसगो ब्राह्मणस्य कर्म प्रतिपादयन्ती स्मृतिराह- ब्राह्मणः ज्ञानविज्ञानाभ्यां प्रयतेत । क्षत्रियः अनालसो भूत्वा रक्षार्थ गच्छेत् । राज्यकोषसवर्द्धको वैश्य प्रामुख्येन कृषिकर्म सम्पादयेत् तदनु गवादियशूनां संवर्द्धनाय

तस्य प्रयासः भवेत् प्रदेशान्तराणां वस्तूनां विनिमयः तेषां मूल्य निर्धारणं विक्रयणस्य च कार्य वैश्यस्यैव । भृत्यानां, सेवकानां, लेखकानां च वेतनादिकस्य निर्धारणमपि वैश्यस्य कार्य इतोऽधिकमपि वैश्यस्य कार्य वर्तते वक्तुं शक्यते वैश्यस्य राष्ट्रे महत्कार्यमस्ति ।

शिक्षाज्ञानहीनः शूद्रः ब्राह्मणादि त्रयाणां सेवायां रतोभूत्वा जीवनं चालयेत् । यदि शिक्षितः शूद्रः अस्ति तर्हि तदनुसारं कार्य तस्यानुमोदितं भवेत् । शिक्षायाः आदर: भवेत् अन्यथा समाजे असन्तोषस्य बीजं जायते।

इदानी श्लोकाः उदाहियन्ते -

ज्ञानविज्ञान वृद्ध्यर्थ ब्राह्मणो यत्नमाचरेत् ।

रक्षार्थ क्षत्रियो नित्यं यतेतालस्यवर्जितः ॥

कृषिव्यापार वृद्ध्यै च पशुरक्षणहेतवे।

वैश्यस्तु प्रयतेतात्र राष्ट्रवैभववर्धकः ॥

क्रयविक्रययोर्मूल्यं वस्तूनां सार्वदेशिकम् ।

कालस्थाने च निष्पत्तेर्वस्तुभृत्यपरीक्षणम् ।।

रक्षावृद्ध्योरूपायां श्चोपयुक्तं पशुवस्तुनोः ।

नानाभाषापरिचयं लाभ हान्योःविवेचनम् ।।

भाटवेतन विज्ञानं जानीयाद्वणिजां वरः ।

द्विजाश्च समुपासीत शूद्रोविद्याविवर्जितः ।।[29]

श्री रऊमहोदयस्य स्मृतौ मानवधर्मशास्त्रस्य विचारोऽपि प्रवहति यत्र मनुः चतुर्णा नां कृते अहिंसादीनां व्याख्यानं करोति तान् विषयान् रेऊ अपि शब्दान्तरेण काशयति । अत्र समेषामयं धर्मः मनोवाक्कर्मभिः सत्यादीनां परिपालनमावश्यकम । तद्यथा -

"अहिंसा त्रिविधा सत्यं दमोऽस्तेये पवित्रता।

इति वर्ण चतुण्कस्य धर्मोऽत्र मनुमोदितः ।।[30]

अग्रे रेऊमहोदयः कर्म भिरेवश्रेष्ठाभावं स्वीकरोति। यदि कश्चन शूद्रः शुद्रः कुलोत्पन्नोऽपि परोपकारे रतः, आचारयुक्तः जीवनं यापयति तत्रैव कोऽपि ब्राह्मणः अभिमानेन मदिरापानासक्तः, चरित्रहीनो भूत्वा शूद्रात् आत्मानं श्रेष्ठ स्वीकरोति सर्वथा अन्याय्यः अशास्त्रीमश्च । सत्कर्म पालकः सर्वदा अम्यर्हणीयो भवति नास्ति सन्देहः –

"उच्चकर्मरतः शूद्रो ब्राह्मणा नीचकर्मकृत् ।

उभयोरूच्चकर्मैव श्रेयान्, नो नीचकर्म कृत् ।।[31]

अन्यच्च -

यागाध्ययन दानं चादानाऽध्यापनयाजनम् ।

मनुनाख्यायि विप्राणां क्रमात् कर्म च जीवनम् ।।

यजनाध्ययेन दानं क्षात्रं धर्म स उक्तवान् ।

_रक्षावृत्तिः पुनस्तेषां विज्ञेया सर्वसम्मता ।।

पठनं च सवो दानं वैश्यधर्मो मनूदितः ।

वृत्तिश्च, कृषिवाणिज्ये पशुपालन वर्धने ।। [32]

विश्वेश्वरनाथः श्रीमद्भगवत कारस्यापि पक्षं प्रस्तौति यथा ब्राह्मणादीनां वर्णानां धर्माः निरूपिताः । जीविकोपायस्यापि संग्रहः कृतः । ब्राह्मणस्यकृते षट्कर्माणि मनरूक्तानि भवन्ति तत्रैव षट्कर्मसु जीविकोपायस्य व्यवस्था निरूपिता । तथैव अन्यस्य वर्णस्य च कृते ज्ञातव्यम् । अत्रैका शंका उदेति यदि ब्राह्मणस्य जीविकोपार्जनं सन्ततीनां पालनं यज्ञयागादिभि न सम्भवति तर्हि असौ किं कुर्यात् ? शास्त्रे तस्य बहुचिन्तनं वर्तते। जीवनस्य विकल्प: सर्वत्र अस्माकं शास्त्रे उपलभ्यते मृत्युः कस्यापि शरणं नास्ति । शास्त्रणां सारसिद्धान्तो वर्तते

यदि स्वेन कर्मणा कलेशः अनुभूयते, भोलनादिकं नोपलभ्यते तर्हि द्वितीयस्य वर्णस्य वृत्ति स्तेन विप्रेण स्वीकर्त्तव्या शनैः शनैः यदि कालः अनुकूलोभवति पुनः ब्राह्मणस्यं वृत्तिं धरेत । तथैव क्षत्रियः वैश्यस्य, वैश्यः शूद्रस्य च वृत्तिं धरेत् मरणावस्थायां तु ब्राह्मणः शूद्रस्यपि वृत्ति गृहीतुं शक्नोति । रेऊ महोदयस्य वचनं -

"ज्ञानर्जनं तु विप्रस्य रक्षणं क्षत्रियस्य च।

व्यापारश्चाथ वैश्यस्य कर्ममुख्यं मतं बुधैः ।।

सम्भवेत् सुखवृत्ति! शास्त्रेक्तैः कर्मभिर्यदि।

अन्योन्यवृत्तितस्तर्हि जीवेल्यक्त दुराग्रहः ।।[33]

रेऊ महोदयः अन्नस्य महत्त्वं हृदयेन स्वीकरोतत । 'अन्न ब्रह्म' इति शतपथब्राह्ममणे निरूपितम् अन्नस्य प्राप्तिः यन्त्रेन न भवति तत्कृते भूमे। कर्षणं हलप्रवाहः, कृषिकर्म च । अद्यतनीयः सार्वभौमिकः प्रश्नः कृषि कर्म कः कुर्यात् कस्याधिकारा अत्र । अनेके वदन्तिकर्षनेन जीवाः नियन्ते तस्मादत्र हिंसा भवति, केचन धर्मरूपो वृषभः कथं तस्य

हलयन्त्रे नियोजनम् । अन्येभाषन्ते मूर्खानां कर्मेदं ? परन्तु एते सर्वे तत्वज्ञानहीनाः मूढा अलसाश्च सन्ति । पराशरो वदति कृषिकर्मणि ब्राह्मणस्य प्रथमोऽधिकारः -

"षट्कर्मनिरतोविप्रः कृषिकर्म समाचरेत्" ।[34]

षट्कर्म संपादकः विद्वान भवति स च ब्राह्मणः । विदुषां धर्मः कृषिकर्म । अत एव विश्वेश्वर नाथो लिखति -

"भूमिगर्भ गतानां हि जीवानां नाशशंकया ।

निन्दन्ति कृषिम• येन ते तत्वार्थबोधिनः ।।

वैरादकारणाद्वापि या हिंसा सा विनिन्दिता ।

नो चेदुच्छ्वासनिः श्वास क्रियापि स्यादसम्भवा ।।

अशुचीन्यथ निन्द्यानि क्रौर्यमिश्राणि वा पुनः ।

कर्माण्येवात्र वानि न दोषोऽस्त्यन्यकर्मसु" ।।[35]

संसारे सर्वे मनुष्याः सन्ति चाण्डालोऽपि प्रथमतः मनुष्य एव । मनुष्यः मनुष्यस्यानादरं न कुर्यात । शूद्रः अपि सम्माननीयः भवति । अनादेरण समाजे प्रीतिभंगापतिः दृश्यते । अशिक्षितः शूद्रः यथासमार्थ्य ब्राह्मणादीन् सेवेत् । वेदमन्त्रं विना शूद्राणां संस्कारः विधिसम्मतः । जीवः आचरेणन्, विचारेण च श्रेष्ठत्वमधिगच्छति । तत्र धर्मः सम्प्रदायो वा प्रमुखो नास्ति अयमत्र विशेषः आत्मोन्नत्यै ब्राह्मणादिषु जन्मग्रहणं कारणं नास्ति सदाचार सद्विचारश्च प्रमुखौ भवतः । यथा च -

"शट्रैरपि यथा शक्यं विद्याविरहितैः स्वयम।

सेव्या द्विजातयो भक्त्या विद्वद्भिस्त्वन्य वृत्तया ।।

शदादयोऽप्यमन्त्राणि सत्कर्माणि निरन्तरम् ।

कुर्युजगति तेषां तु मन्त्रत्यागेऽपि न क्षतिः ॥

श्रेष्ठाऽऽचारैर्विचारैश्च जीवो यातिसमुन्नतिम् ।

आम्नायानां च धर्माणां नाऽपेक्षा तत्र सम्मता" ॥[36]

विश्वेश्वर नाथस्य समग्रं चिन्तनं विस्तरेण दृश्यते । परन्तु संक्षेपेण ब्राह्मणस्य तपः कर्म क्षत्रियस्य पालनधर्मः, वैश्यस्य व्यवसायप्रकृतिः शूद्रस्य सेवाधर्मः एव अस्यैव यत्रतत्र प्रमाणं प्राप्यते यथा -

"ब्राह्मणस्य तपो ज्ञानं क्षत्रियस्य च रक्षणम् ।

वैश्यस्य व्यवसायश्च शूद्रस्य द्विजसेवनम्" ॥ [37]

प्रसङ्गोऽस्मिन् अन्येषा मतमालोच्यते । मनास्मृतावपि चत्वारः वर्णाः प्रकल्पिताः आपस्तम्बस्य विचारः वर्तते ब्राह्मणः अस्त्रं न गृहणीयात् मनुः परिस्थितिविशेषे अस्त्रग्रहणे अनुमति प्रयच्छति तद्यथा

गवार्थे ब्राह्मणार्थे वर्णानां वापि संकटे ।

गृह्णीयातां विप्रविशै शस्त्रं धर्मव्यवेच्छया ॥[38]

महाभारतस्य संग्रामे द्रोणाचार्यकृपाचार्यो ब्राह्मणौ आस्ताम् उभौ शस्त्र जीविनावेव ।

गौतमस्य विचारे सन्ततीनां पालनाय कृषि-क्रय-विक्रय-कुसीदानि च ब्राह्मणाः कुर्वीरन् । तत्रैव वशिष्ठ धर्म सूत्रस्य कथनं यदि ब्राह्मणः कुसीदस्य धनं गृद्णाति तद्धनं ब्रह्महत्यासमं ज्ञातव्यम् मनुस्मृतौ कुसीदग्रहणविषयेऽयं श्लोकः –

"ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत।

कामं तु खलु धर्मार्थ दद्यात् पापीयसेऽल्पिकाम्" ॥[39]

प्रायेण सर्वेषां स्मृति काराणां मते ब्राह्मणस्य प्रथमं कर्म वेदाध्ययनम् अनन्तरमेव अन्य शास्त्रस्य अध्ययनम् तस्मात् मनुराह -

"योऽनधीत्य द्विजो वेदमन्यत्र कुरूते श्रमम् ।

स जीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः ॥ [40]

बौधायनस्य मतं किञ्चितं शिथिलं प्रतिभाति यदि ब्राह्मणः वेदाध्ययनेऽसमर्थः भवति स वैश्यस्य वृतिं गृह्णीयात् तत्रापि नियमः भवेत् पराशरोऽपि नियमपूर्वक शैथिल्यं प्रयच्छति सारांशः वर्तते मर्यादायां स्थित्वा जीवनोपायं कुर्यात ।

अत्रिस्मृतौ ब्राह्मणस्य दशप्रविभागाः सन्ति ये कर्मभिः अंकिताः –

१. देव-ब्राह्मणः २. शूद्र-ब्राह्मणः

३. मुनि-ब्राह्मणः ४. निषाद-ब्राह्मणः

5. द्विज-ब्राह्मणः 6. म्लेच्छ-ब्राह्मणः

७. क्षत्र ब्राह्मणः 8.चाण्डाल-ब्राह्मणः

६. वैश्य-ब्राह्मणः १०. पशु-ब्राह्मणः

देवलः अष्टविभागां मनुते ब्राह्मणस्य

1. जाति-ब्राह्मणः - वंशे उत्पन्नः
2. ब्राह्मणः - किञ्चिद् वदेशः
3. श्रोत्रियः षड्गौः परिपूर्णः
4. अनूचानः वेदार्थज्ञः, अग्निहोत्री च
5. भ्रूणः यज्ञसम्पादकः यज्ञशिष्टाशी
6. ऋषिः कल्पः लोक-वेदयोः सम्यक् ज्ञाता संयमी च
7. ऋषिः ब्रह्मचारी-सत्यवादी, आप्तः
8. मुनिः निवृतः अनासक्तश्च।

शातातपः अब्राह्मणानपि षट्भेदान् मनुते -

अब्राह्मणाश्च षट्प्रोक्ता ऋषिः शातातपोऽब्रवीत्।

आद्यो राजाश्रयस्तेषां द्वितीयः क्रयविक्रयीय ॥

तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजक।

पंचमस्तुभृत स्तेषां ग्रामस्य नगरस्य च ॥

अनागतां तु यः पूर्वा सादित्यां चैव पश्चिमम्।

नोपासीत द्विजं सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥

बहुभिः प्रकारैः स्मृतीनां समालोचनेन ज्ञायते सद्व्यवहारः, आचरणं, सर्वैः पालनीयम् अन्यथा पतितो भवति मनुष्यः। समाजस्य मध्ये सामञ्जस्यं केन स्यात् तत्कृते यतेत। राष्ट्रस्य संवर्द्धनाय, उन्नत्यै सर्वदा दत्रयित्तेन भाव्यं मनुष्यैः।

सन्दर्भग्रन्थाः -


1. मत्स्य पुराणम् - १४४-३०-३१
2. आवसथ्याग्निः, गार्हपत्याग्निः, सभ्याग्मिः, आवहनीयाग्निः, दक्षिणाग्निः।
3. मतस्य पुराणम् - १४-३०-३१
4. महाभारते अनुशासन पर्व १४१-६५
5. बौधायनसूत्रे।

6. मनुस्मृतिः - १२-८८, ८६

7. मनुस्मृतिः - १२

8. वराहपुरामणम्।

9. उपनिषद्

10. मनुस्मतिः

11. महाभारते

12. देवल स्मृतौ

13. महाभारते

14. वेदान्तसारः

15. श्रीमद्भगवद्गीता

16. मनुस्मतिः ४-२२६

17. विश्वश्वर स्मृतिः द्वितीयाधिकारे- ७०, ७१

18. विश्वेश्वर स्मृतिः द्वितीयाधिकारे - ७२-७३

19. विश्वश्वर स्मृतिः द्वितीयाधिकारे- ४.५

20. विश्वेश्वर स्मृतिः अधिकार १२-३७

21. १. श्रीमद्भगवतगीता।

22. २. विश्वश्वर स्मृतिः द्वादशाधिकार- ३१

23. ३. विश्वेश्वर स्मृतिः द्वादशाधिकारः ३३-३४

24. १. विश्वश्वर स्मृतिः प्रथमाधिकारः ६८

25. १. विश्वश्वर स्मृतिः प्रथमोधिकारः ६६–१०२

26. १. विश्वश्वर स्मृतिः प्रथमोधिकारः १०३-१०७

27. १. विश्वश्वर स्मृतिः प्रथमोधिकार: १०८-११४

28. १. विश्वेश्वर स्मृतिः प्रथमोऽधिकारः ११७–१२३

29. १. विश्वेश्वर स्मृतिः नवमोऽधिकारः - १४८-१५२ श्लोकाः

30. १. विश्वेश्वर स्मृतिः दशमोऽधिकारः - २१

31. २. विश्वेश्वर स्मृतिः दशमोऽधिकारः –२३

32. ३. विश्वेश्वर स्मृतिः दशमोऽधिकारः - २५-२७ श्लोकाः

33. १. विश्वेश्वर स्मृतिः दशमोऽधिकारः २८,२६

34. १. पराशर स्मृतिः

35. २. विश्वेश्वर रमृतिः दशमोऽधिकारः ३०-३२

36. विश्वेश्वर स्मृतिः दशमोऽधिकारः ३६-४१

37. विश्वेश्वर स्मृतिः दशमोऽधिकार: ४२

38. मनुस्मृति

39. मनुस्मृतिः - १०-११७

40. मनुस्मृतिः